तदीयसर्गनामकरणे विशेषमाह” सा० द० “नामास्य सर्गोपादेयकथया सर्गनाम तु” इत्यभिधाय “अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः” यथा भारते रामोपाख्यानम्। नलोपाख्यानं शकुन्तलोपाख्यानमित्यादि आख्यान+अस्त्यर्थे अर्श० अच्। ६प्रसिद्धाख्यानसंज्ञकसर्गयुक्ते आर्षमहाकाव्यभारतादौ। “स्वाध्यायं श्रावयेत् पित्र्ये धर्म्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणानि खिलानि च” मनुः साङ्गोपनिषदान् वेदान् चतुराख्यानपञ्चमान्” भा०व०। स्वार्थे कन् तत्रैव “नाटकाख्यानकादेशव्याख्यानादिक्रियानिपुणैः” काद०।

**आख्यानकी** स्त्री “आख्यानकी तौ जगुरू गऔजे जतावनोजे जगुरू गुरुश्चेदिति” लक्षिते विषमवृत्तभेदे।

**आख्यायक** पु० आ+ख्या—ण्वुल्। परोक्तस्यान्यत्र कथके १दूते “आख्यायकेभ्यः श्रुतसूनुवृत्तिः भट्टिः” २कथकमात्रे त्रि०।

**आख्यायिका** स्त्री आ+ख्या–ण्वुल् “आख्यायिका कथावत् स्यात् कवेर्वंशादिकोर्त्तनम्। अस्यामन्यकवीनाञ्च वृत्तम् गद्यं क्वचित् क्वचित्। कथांशानां व्यवच्छेद आश्वास इति बध्यते। आर्य्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्। अन्योपदेशेनाश्वासः मुखे भाव्यर्थसूचनम्” सा०द० उक्ते कथाभेदे कथा च “कथायां सरसं वस्तु गद्यैरेव विनिर्म्मितम्। क्वचिदत्र भवेदार्य्या क्वचिद्वक्त्रापवक्त्रके। आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकोर्त्तन”मित्युक्तलक्षणयुक्ता तत्र आख्यायिका यथा हर्षचरितादि” कथा कादम्बर्य्यादिः। २उपलब्धार्थबोधककथायाञ्च” अमरः।

**आख्यायिन्** त्रि० आ+ख्या—णिनि। १ कथके। २आवेदके दूतादौ च “रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः” शकु०।“रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितम्”याज्ञ०

**आगत** त्रि० आ+गम—क्त। १आयाते, २उपस्थिते, ३प्राप्ते च। “हेयं दुःखमनागतम्” पात० “क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यत्”स्मृतिः। “पितृतआगतम् पित्र्यमिति” दायभा०। “तत आगतः” पा०। आगता वत जरेव हिमानी सेव्यतां सुरतरङ्गिणी” उद्भटः भावे क्त। ४आगमने न० “गतागतं कामकामा लभन्ते” गीता।

**आगति** स्त्री आ+गम—क्तिन्। १आगमने “लोकस्यास्य गतागतिम्” रामा०। २प्राप्तौ च तासामध्वर्य्युरागतौ यवो वृषीव मोदते” ऋ०२,५,६। वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च। आर्त्त्या गत्या तथाऽऽगत्या” याज्ञवल्क्यः।

**आगत्य(म्य)** अव्य० आ+गम—ल्यप् वा मोलोपे तुक्। आगमनं कृत्वेत्यर्थे तत्त्वमागत्य सत्येन” याज्ञ०। “आगत्य विल्वशाखायां चण्डिके! कुरु सन्निधिम्” पुरा०।

**आगन्तव्य** त्रि०आ+गम—तव्य। १आगम्ये प्राप्ये “आगन्तव्यं तु नोद्रष्टुं पुनराश्रममण्डलम्” भावे तव्य। २अवश्यागमने न० आगन्तव्यं झटितिमथुरामण्डलात् गोपकान्ते! पदाङ्कदूतम्।

**आगन्तु** पु० आ+गम—तुन्। १अनियतस्थायिनि अतिथौ “वैदर्भमागन्तुमजं गृहेशम्” रघुः। २हठादुपस्थिते च आगन्तुना सह मैत्री न कर्त्तव्या” हितो०। ३आगमनशीले त्रि०। स्वार्थे कन्। आगन्तुकोऽप्यत्र।

**आगन्तुज** त्रि० आगन्तोः हठादुपस्थितात् जायते जन—ड। हठोपस्थितजाते रोगादौ। “आगन्तुजे भिषग्रोगे शस्त्रेणोत्कृत्य यत्नतः”। “दोषागन्तुजमृत्युभ्योरससन्त्रविशारदौ” सुश्रुतः।

**आगम** पु० आ+गम—घञ्। १आगतौ २प्राप्तौ ३उत्पत्तौ च “आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत!” गीता, आगम्यते प्राप्यतेऽनेन करणे घञ्। ४सामाद्युपाये “आगमैः सदृशारम्भ आरम्भसदृशोदयः” रघुः आगम्यते स्वत्वमनेन। स्वत्वप्रापके ५क्रयप्रतिग्रहादौ “आगमोनिष्फलस्तत्र भुक्तिःस्तोकापि यत्र नो” या० स्मृतिः “अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि” स्मृतिः” यादृशागमस्य प्रामाण्यं तन्निरूपितम् मिता०। “भोगमात्रस्य स्वत्वव्यभिचारात् कीदृशोभोगः प्रमाणमित्यत आह। “आगमोऽभ्यधिकोभोगाद्विना पूर्व्वक्रमागतात्” या०स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः। स भोगादभ्यधिकोबलीयान् स्वत्वबोधने भोगस्यागमसापेक्षत्वात्। यथाह नारदः। “आगमेन विशुद्धेन भोगोयाति प्रमाणताम्। अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छतीति”। न च भोगमात्रात्स्वत्वावगमः परकीयस्याप्यपहारादिनोपभोगसम्भवात्। अतएव “भोगं तु केवलं यस्तु कीर्त्तयेन्नागमं क्वचित्। भोगच्छलापदेशेन विज्ञेयः स तु तस्कर” इति स्मर्य्यते। अतश्च सागमोदीर्घकालो निरन्तरो निराक्रोशः प्रत्यर्थिप्रत्यक्षश्चेति पञ्चविशेषणयुक्तो भोगः प्रमाणमित्युक्तम्भवति। तथा च स्मर्य्यते ‘आगमो दीर्घकालश्चाविच्छेदोऽन्यरवोज्झितः। प्रत्यर्थिसन्निधानश्च परिभोगोऽपि पञ्चधेति”। कश्चित्त्वागमनिरपेक्षस्यापि भोगस्य प्रामाण्यमित्याह। विना पूर्व्वक्रमागतादिति।